# शुद्धिकौमुदी

पाठः २ – २२.०४.२०१७

© All the content in these slides is the intellectual property of Vyoma Linguistic Labs Foundation.
Replication/reuse in any form without express written permission from the organisation is prohibited.

पुनस्स्मारणम्

# लेखनदोषाः

## मकारलेखनम्

नियमः – अनुस्वारात् स्वरे परे मकारः एव लेखनीयः, न तु अनुस्वारः । अतः, स्वरे परे मकारलेखनम् एव शुद्धम्, अनुस्वारलेखनम् अशुद्धम् । स्वरे परे मोऽनुस्वारः (८.३.२३) इत्यस्य सूत्रस्य अप्रवृत्तिः । व्यञ्जने परे तु अस्य सूत्रस्य प्रवृत्तिः भवति ।

- बालः गृहम् आगतवान्
- रामः फलम् इच्छति
- रामं वन्दे
- गुरुं नमामि


vyoma ॥ वाचं धेनुमुपासीत ॥ Saṃskṛtam · Value Education · Technology

# लेखनदोषाः

परसवर्णलेखनम्

अंगणम्

अंडम्

चंचूः

पम्पा

# लेखनदोषाः

## परसवर्णलेखनम्

- **नित्यम्** - अनुस्वारस्य पुरतः वर्गीयव्यञ्जनानि यवलाश्च यदा भवन्ति , तदा सदृशः परसवर्णः लेखनीयः । "अनुस्वारस्य ययि परसवर्णः" (८.४.५८) इति पाणिनिसूत्रम् । एतादृशेषु स्थलेषु परसवर्णरहितानि (अनुस्वारसहितानि) रूपाणि असाधूनि एव ।


vyoma ॥ वाचं धेनुमुपासीत ॥ Saṃskṛtam · Value Education · Technology

# लेखनदोषाः

## १.२ परसवर्णलेखनम्

| अशुद्धानि | शुद्धानि |
|---|---|
| अंगणम् | अङ्गणम् |
| चंचूः | चञ्चूः |
| अंडम् | अण्डम् |
| शांतः | शान्तः |
| पंपा | पम्पा |



vyoma ॥ वाचं धेनुमुपासीत ॥ Saṃskṛtam · Value Education · Technology

# लेखनदोषाः

## परसवर्णलेखनम्

**विकल्पेन** - पदान्ते तु परसवर्णः विकल्पेन । अतः, सङ्घटनं/सङ्घटनं, सञ्चयः/संचयः इत्यादिषु रूपद्वयम् अस्त्येव । अत्र "वा पदान्तस्य" (८.४.५९) इति पाणिनिसूत्रम् ।


vyoma ॥ वाचं धेनुमुपासीत ॥ Saṃskṛtam · Value Education · Technology

# अभ्यासः १

## शुद्धं रूपं चिनुत

- अंगणम्
- चंचूः
- शांतः
- अण्डम्
- पम्पा


vyoma ॥ वाचं धेनुमुपासीत ॥
Saṃskṛtam · Value Education · Technology

# अभ्यासः १ - उत्तराणि (शुद्धानि रूपाणि)

- अङ्गणम्
- चञ्चूः
- अण्डम्
- शान्तः
- पम्पा


vyoma ॥ वाचं धेनुमुपासीत ॥
Saṃskṛtam · Value Education · Technology

# द्वित्त्वम् (सामान्यम् - १)

केषाञ्चित् पदानां लेखनावसरे केचन वर्णाः द्विवारं लेखनीयाः भवन्ति । उच्चारणश्रवणेन द्वित्वं यद्यपि न ज्ञायते, तथापि लेखनावसरे तत् लेखनीयम् एव । कानिचन उदाहरणानि पश्यामः -

| अशुद्धानि | शुद्धानि |
|---|---|
| • महत्वम् | • महत्त्वम् (महत् +त्वम्) |
| • सत्वम् | • सत्त्वम् (सत् + त्वम्) |
| • तत्वम् | • तत्त्वम् (तत् + त्वम्) |
| • सात्विकम् | • सात्त्विकम् |
| • उज्वलः | • उज्ज्वलः (उत् + ज्वल) |
| • पाश्चात्यः | • पाश्चात्त्यः (पश्चात् + त्यक्) |

# द्वित्त्वम् (सामान्यम् - १)

## अन्यानि कानिचन उदाहरणानि -

| अशुद्धानि - | शुद्धानि - |
| --- | --- |
| • कार्तिकमासः | • कार्त्तिकमासः |
| • तज्ञः | • तज्ज्ञः (तत् + ज्ञः) |
| • कित्वम् | • कित्त्वम् (कित् +त्वम्) |
| • छित्वा | • छित्त्वा (छिद् + त्वा) |
| • भित्वा | • भित्त्वा (भिद् + त्वा) |
| • उध्वस्तः | • उद्ध्वस्तः (उत् + ध्वस्तः) |

# द्वित्त्वम् (सामान्यम् - २)

येषां पदानाम् अन्तिमस्वरात् पूर्वं द्वित्वघटितवर्णौ भवतः, तेषां तृतीयादिविभक्तौ द्वित्वं स्यादेव । यथा - वृत्तिः -> वृत्त्या ; भित्तिः -> भित्त्या

| प्रथमान्तम् - | अशुद्धम् - | शुद्धम् - |
| --- | --- | --- |
| • प्रवृत्तिः | • प्रवृत्या | • प्रवृत्त्या |
| • विच्छित्तिः | • विच्छित्या | • विच्छित्त्या |
| • विपत्तिः | • विपत्या | • विपत्त्या |
| • बुद्धिः | • बुध्या | • बुद्ध्या |
| • शुद्धिः | • शुध्या | • शुद्ध्या |
| • व्युत्पत्तिः | • व्युत्पतिः | • व्युत्पत्त्या |


vyoma ॥ वाचं धेनुमुपासीत ॥
Saṃskṛtam · Value Education · Technology

# द्वित्त्वम् (सामान्यम् - २)

द्वित्वघटितेन उपान्त्यवर्णेन युक्ताः शब्दाः सन्धौ यदा पूर्वपदत्वं प्राप्नुवन्ति, तदा अपि तेषां द्वित्त्वं करणीयम् एव ।

---

अशुद्धम् -

- शुध्यर्थम्
- समृध्यर्थकः
- प्रवृत्यादयः
- समृध्युपायः
- उत्पत्यर्थे

शुद्धम् -

- शुद्ध्यर्थम्
- समृद्ध्यर्थकः
- प्रवृत्त्यादयः
- समृद्ध्युपायः
- उत्पत्त्यर्थे

# द्वित्त्वम् (सामान्यम् - २)

द्वित्वघटितेन उपान्त्यवर्णेन युक्ताः शब्दाः सन्धौ यदा पूर्वपदत्वं प्राप्नुवन्ति, तदा अपि तेषां द्वित्त्वं करणीयम् एव ।

---

अशुद्धम् -

- शुध्यर्थम्
- समृध्यर्थकः
- प्रवृत्यादयः
- समृध्युपायः
- उत्पत्यर्थे

शुद्धम् -

- शुद्ध्यर्थम्
- समृद्ध्यर्थकः
- प्रवृत्त्यादयः
- समृद्ध्युपायः
- उत्पत्त्यर्थे

# द्वित्वम् (सामान्यम् - ३)

केषुचित् पदेषु दुस्-दुर् इत्यादीनां प्रादीनाम् (उपसर्गाणाम्) अनन्तरं सकारादिः शब्दः भवति । तादृशे प्रसङ्गे विसर्गसन्धेः नियमः स्मर्तव्यः ।

---

विसर्गः सकारः एव वा लेखनीयः । सकारे लिखिते सकारद्वयं दृश्येत (उपसर्गसम्बद्धः एकः सकारः/सादिसम्बद्धः अपरः सकारः)।

| अशुद्धम् - | शुद्धम् - |
| --- | --- |
| • दुस्थितिः | • दुस्स्थितिः/दुःस्थितिः |
| • मनस्थितिः | • मनस्स्थितिः/मनःस्थितिः |
| • निस्थानम् | • निस्स्थानम्/निःस्थानम् |
| • निस्पृहः | • निस्स्पृहः/निःस्पृहः |
| • शिरस्नानम् | • शिरस्स्नानम्/शिरःस्नानम् |
| • वयस्तरः | • वयस्स्तरः/वयःस्तरः |

# द्वित्त्वम् (सामान्यम् - ३)

केषुचित् पदेषु दुस्-दुर् इत्यादीनां प्रादीनाम् (उपसर्गाणाम्) अनन्तरं सकारादिः शब्दः भवति । तादृशे प्रसङ्गे विसर्गसन्धेः नियमः स्मर्तव्यः ।

---

विसर्गः सकारः एव वा लेखनीयः । सकारे लिखिते सकारद्वयं दृश्येत (उपसर्गसम्बद्धः एकः सकारः/सादिसम्बद्धः अपरः सकारः)।

| अशुद्धम् - | शुद्धम् - |
|---|---|
| • वक्षस्थलम् | • वक्षस्स्थलम्/वक्षःस्थलम् |
| • निसृतम् | • निस्सृतम्/निःसृतम् |
| • निस्वार्थः | • निस्स्वार्थः/निःस्वार्थः |
| • अप्सरस्त्री | • अप्सरस्स्त्री/अप्सरःस्त्री |
| • ज्योतिशास्त्रम् | • ज्योतिश्शास्त्रम्/ज्योतिःशास्त्रम् |
| • दुस्वप्नः | • दुस्स्वप्नः/दुःस्वप्नः |

# द्वित्त्वम् (विशेषः)

’दा’धातोः त्त्वाप्रत्यये “दो दद्घोः” (पा.सू. ७.४.४६) इति सूत्रेण दद्भावः । [’दथ्’ इति आदेशः इत्यर्थः] तस्मात्, दत्त्वा इति तकारद्वयोपेतं रूपम् इति विशेषः ।

---

# द्वित्त्वं विकल्पेन

अ) मर्यादा /मर्य्यादा , अर्कः /अर्क्कः , तात्पर्यम्/तात्पर्य्यम्

आ) न ह्यस्ति, न ह्य्यस्ति, अपह्नुतिः /अपह्ह्नुतिः

इ) सिध्यति / सिद्ध्यति , सुद्ध्युपास्यः /सुद्ध्युपास्यः, वल्मीकः /वल्ल्मीकः

एतेषु सर्वेषु उदाहरणेषु द्वित्वं विकल्पेन । “अचो रहाभ्यां द्वे” (पा.सू. ८.४.४६), “अनचि च” (पा.सू. ८.४.४७) इत्येताभ्यां सूत्राभ्याम्

एतेषु द्वित्वं विकल्पेन विहितम् ।

# अनुस्वारः

केषुचित् शब्देषु अनुस्वारः त्यज्यते बहुधा । यथा - सन्यासी - अशुद्धम् । संन्यासी - शुद्धम् ।

अत्र ’सम्’ इति उपसर्गः । उपसर्गतः ’म’कारः लोपं नार्हति कथमपि । अतः, अनुस्वारः लेखनीयः एव ।

१.२.

| अशुद्धम् (✗) | शुद्धम् (✓) |
| --- | --- |
| पुल्लिङ्गः/पुंल्लिङ्गः | पुँल्लिङ्गः/पुंलिङ्गः |

पुं + लिङ्गः इति स्थिते *'वा पदान्तस्य'* (८.४.५९) इति सूत्रेण विकल्पेन परसवर्णः । परसवर्णे कृते लकारस्य सवर्णः 'लँ' इत्यादेशः अनुस्वारस्य । तदा **'पुँल्लिङ्गः'** (अनुनासिकघटितलकारयुक्तम्) इति रूपम् । अत्र लकारद्वयं दृश्यते । परसवर्णाभावे तु अनुस्वारः । **'पुंलिङ्गः'** इति रूपम् । एकः लकारः अत्र ।

एवं च - १) लकारद्वयं लिखितं चेत् अनुनासिकम् अपि लेखनीयम् । (पुँल्लिङ्गः)

२) अनुस्वारः लिखितः चेत् एकः एव लकारः लेखनीयः । (पुंलिङ्गः)

अन्यानि सर्वाणि रूपाणि असाधूनि एव ।

एतदत्र अवधातव्यं यत् 'पुलँलिङ्गम्' इति लेखनम् एव साधु स्यात् । किन्तु लिख्यते - 'पुँल्लिङ्गम्' इति । अत्र लेखनावसरे यद्यपि पकारस्य उपरि अनुनासिकचिह्नं (ँ) दृश्यते, तथापि अनुनासिकता तु लकारस्य एव, न तु पकारोत्तरस्य उकारस्य । लिपेः परिमितसामर्थ्यम् एव अत्र कारणम् ।

QUESTIONS/DOUBTS?

Email us @

sanskritfromhome@vyomalabs.in

For downloading course-materials, login @
www.sanskritfromhome.in

Subscribe to our youtube channel @
vyoma-samskrta-pathasala

Buy our Samskrita-learning products @
www.digitalsanskritguru.com

Support our cause for Samskrita-Samskriti @
www.vyomalabs.in

vyoma
॥ वाचं धेनुमुपासीत ॥
Saṃskṛtam · Value Education · Technology

© All the content in this presentation is the intellectual property of Vyoma Linguistic Labs Foundation.
All materials shared in our website are purely for the purpose of personal study.
Replication/reuse in any form without written permission from the organisation is prohibited.